# Chapter– 6 (XV)

## अथ चतुर्दशो दधि वर्गः (Dadhivarga)
## (A Chapter on curds)

दधिगुणाः *(Qualities of Curd)*–

दध्युष्णं दीपनं स्निग्धं कषायानुरसं गुरु । पाकेऽम्लं ग्राहिपित्तास्रशोथमेदःकफप्रदम् ।।१।।
मूत्रकृच्छ्रे प्रतिश्याये शीतगे विषमज्वरे । अतीसारेऽरुचौ कार्श्ये शस्यते बलशुक्रकृत् ।।२।।

Dadhi (Curd) is hot in potency, appetizer, demulcent, slightly associated with astringent taste, heavy to digest, sour in post digestive effect, absorbent, alleviates, aggravated Pitta and Rakta, edema, body fats, dysuria, common cold, matarial fevers with rigors, diarrhoea, distate and emaciation. It promotes strength and semen.

भेदाः *(Types)*–

आदौ मन्दं ततः स्वादु स्वाद्वम्लश्च ततः परम् । अम्लं चतुर्थमत्यम्लं पञ्चमं दधि पञ्चधा ।।३।।

There are five types in Dadhi and they are 1. Manda 2. Svādu 3. Svādvamla 4. Amla and 5. Atyamla.

लक्षणाः *(Characters)*–

मन्दं दुग्धवदव्यक्तरसं किञ्चिद्घनं भवेत् । मन्दं स्यात्सृष्टविण्मूत्रं दोषत्रयविदाहकृत् ।।४।।
यत्सम्यग्घनतां यातं व्यक्तत्वादुरसं भवेत् । अव्यक्ताम्लरसं तत्तु स्वादु विज्ञैरुदाहृतम् ।।५।।
स्वादु स्यादत्यभिष्यन्दि वृष्यं मेदःकफावहम् । वातघ्नं मधुरं पाके रक्तपित्तप्रसादनम् ।।६।।
स्वाद्वम्लं सान्द्रमधुरं कषायानुरसं भवेत् । स्वाद्वम्लस्य गुणा ज्ञेयाः सामान्यदधिवज्जनैः ।।७।।
यत्तिरोहितमाधुर्यं व्यक्ताम्लत्वं तदम्लकम् । अम्लं तु दीपनं पित्तरक्तश्लेष्मविवर्द्धनम् ।।८।।
तदत्यम्लं दन्तरोमहर्षकण्ठादिदाहकृत् । अत्यम्लं दीपनं रक्तवातपित्तकरं परम् ।।९।।

Manda dadhi looks like milk, taste not manifested and slightly curdled. This curd (which is not completely solidified) allows the free flow of urine and faces, enhances Tridoṣa and is irritant.

When curd is properly curdled and sweatness manifested alongwith unmanifested sourness, it is called Svādu. This curd blocks the channels. aphrodisiac, enhances fats and induces Kapha. It is sweet in post digestive effect, pacifies Vāta and controls haemorrhage.

Svādvamla curd is thick sweet in taste, followed by astringency. Its properties are similar to that of Svādu.

Sour curd is that in which sweetness is latent and only sourness is manifested. This curd is appetizer, and induces Pitta, Kapha and Rakta diseases.

Atyamla curd is that which causes tingling sensation in the teeth, horripilation and burning sensation of throat. It is very much sour, appetizer and induces Rakta, Vāta and Pitta.